International Journal of Sanskrit Research 2021; 7(4): 90-93

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(4): 90-93
© 2021 IJSR
www.anantaajournal.com
Received: 12-04-2021
Accepted: 02-06-2021

**पङ्कजभट्टः**
साहित्यविभागः, 'उपमा-उत्प्रेक्षयोः अलङ्कारयोः विशेषाः', केन्द्रीय संस्कृत विश्वविद्यालयः, राजीव गान्धी परिसरः, शृङ्गेरी, कर्नाटक, भारत

**Corresponding Author:**
**पङ्कजभट्टः**
साहित्यविभागः, 'उपमा-उत्प्रेक्षयोः अलङ्कारयोः विशेषाः', केन्द्रीय संस्कृत विश्वविद्यालयः, राजीव गान्धी परिसरः, शृङ्गेरी, कर्नाटक, भारत

# उपमा-उत्प्रेक्षयोः अलङ्कारयोः विशेषाः

**पङ्कजभट्टः**

## प्रस्तावना

यद्यपि काव्ये रस एव मुख्य इति सर्वैरालङ्कारिकैः सधैर्यं प्रतिपादितमस्ति, तथाप्यलङ्काराणाम् उपादेयता न केनापि निराकृता । यतो हि कविकर्मसु तेषामलङ्काराणां बाहुल्येन प्रयोगात् । ते च अलङ्कारा काव्ये केवलं रसोपकारकत्वेनालङ्कारा प्रयुज्यन्ते इति वक्तुं न शक्यते, उक्तिवैचित्र्यरूपेणापि काव्येऽलङ्काराणां निवेशात्[1]। शब्दचित्रकाव्ये एतद्द्रष्टुं शक्यते । तथापि बाहुल्येन रसोपकारकत्वेनैव प्रयुज्यन्ते इति तु निर्विवाद एव । मम्मटेन प्रतिपादितमनलङ्कृतत्वमप्येतदेव स्पष्टीकरोति यत्र रस एव प्रधानः तत्र अलङ्काराणाम् अस्फुटत्वमेव शोभते, न तु स्फुटत्वम् । आलङ्कारिकैः विविधालङ्कारेषु सादृश्यमूलकाः अभेदप्रधाना अलङ्काराः प्रोक्ताः । क्वचित् एतेषामलङ्काराणाम् अतीव चमत्कारवशात् अथवा साम्यतावशात् काव्येषु स्पष्टतया अवगन्तुं क्लेशः अनुभूयते । यदत्र कोऽलङ्कारः भवितुमर्हतीति । क्वचित् स्थले तु आलङ्कारिकाणामपि मतभेदः दृश्यते । विशेषतः उपमोत्प्रेक्षयोः अलङ्कारयोः कुत्रचित् महानेव सन्देहः अनुभूयते । अतः तयोः उभयोरपि अलङ्कारयोः विवेचनमत्र क्रियते ।

प्रथमतया उभयोरपि अलङ्कारयोः मूलं पश्यामः । उपमाया मूलं भवति साम्यम् । उत्प्रेक्षायास्तु सम्भावनम् ।

उपमालङ्कारस्य लक्षणम् – 'साधर्म्यमुपमा भेदे'[2] इति ।

उत्प्रेक्षालङ्कारस्य लक्षणम्- 'सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्'[3] । इति ।

उपमा-उत्प्रेक्षालङ्कारयोः भेदस्यावगमने क्वचित् काठिन्यमनुभूयते । अतः अनयोः इत्थं भेदः ज्ञातव्यः –

- यत्र उपमेयोपमानस्य सादृश्यमुच्यते तत्रोपमा । यत्र च सम्भावना क्रियते तत्रोत्प्रेक्षालङ्कारः ।
- उपमायाम् उपमानस्य प्रसिद्धिवशात् विशिष्टविशेषणस्य, वाक्यस्य, उपवाक्यस्य वा आवश्यकता न भवति । परन्तु उत्प्रेक्षायां कविकल्पनावशात् विशिष्टपदानां, विशेषणानां वा आवश्यकता वर्तते ।

---

[1]काव्यप्रकाशः-८.६७(वृत्तौ) 'यत्र तु नास्ति रसस्तत्रोक्तिवैचित्र्यमात्रपर्यवसायिनः'।
[2] काव्यप्रकाशः - ०९.१२५
[3]काव्यप्रकाशः - १०.१३७

- ‘मुखं चन्द्र इव’ इत्यत्रोपमा, ‘मुखमपरः चन्द्र इव’ इत्यत्रोत्प्रेक्षालङ्कारः समन्वेति । अत्र अपरः इति विशेषणं कल्पनाजन्यं वर्तते।
- मन्ये, शङ्के, ध्रुवं, प्रायः, नूनम् – एते ‘उत्प्रेक्षावाचकाः’ शब्दा इत्यतः एतेषां प्रयोगः उपमायां न क्रियते। अतः यत्र एतेषां शब्दानां प्रयोगः दृश्येत् ‘तत्रोत्प्रेक्षा’ अवगन्तव्या।
- यद्यपि ‘इव’ शब्द एतादृशः, यः ‘उपमायाः’‘उत्प्रेक्षायाश्च’ उभयोः वाचकोऽस्ति, तथापि तस्यावगमनम् एवं कर्त्तव्यं यत् – यत्र ‘इव’ शब्दस्य प्रयोगः क्रियापदेन सह भवेत् ‘तत्रोत्प्रेक्षा’ अवगन्तव्या। यथा –

**‘लिम्पतीव तमोङ्गानि वर्षतीवाञ्जनं नभः’**

एवम् उत्प्रेक्षायाम् ‘इव’ शब्दस्य प्रयोगः प्रायः क्रियापदेन सह भवति।

- यदा उत्प्रेक्षावाचकस्य ‘इव’ शब्दस्य सम्बन्धः क्रियया सह अभूत्वा केनचित् अन्यपदेन सह भवेत्, तत्रोत्प्रेक्षायाः निर्णयः कठिनः भवति । अतः उत्प्रेक्षालक्षणस्य साहाय्यं स्वीकर्त्तव्यम्। उपमायाः प्राणं तु ‘सादृश्यम्’, उत्प्रेक्षायाः ‘सम्भावना’ च विद्यते । सादृश्ये ‘उपमानपदार्थ’स्य सत्ता ‘वास्तविकी’ भवति, किन्तु सम्भावनायाम् ‘उपमानपदार्थः’ कदाचित्काल्पनिकोऽपि भवति। ‘उपमेयस्य’ विद्यमानेन उपमानेन सह वास्तविकं सादृश्यम् ‘उपमा’ कथ्यते । ‘उपमेयस्य’ कदाचित्कल्पितोपमानरूपेणापि सम्भावना ‘उत्प्रेक्षा’ कथ्यते। अतः –

  “बालेन्दुवक्राण्यविकासभावात् बभुः पलाशान्यतिलोहितानि।
  सद्योवसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्[4]”॥ इति।

बालवत् चन्द्रसदृशम् अर्धचन्द्राकारः, अत्यन्तरक्तवर्णीयपलाशपुष्पञ्च, वसन्तस्य समागमेन समुद्भूतानां वनस्पतीनां नखक्षतसदृशं प्रतीयते।
केचन आलङ्कारिकाः अस्मिन् पद्ये उपमालङ्कारः वर्तते इति वदन्ति । वस्तुतः वनस्थलीनां ‘नखक्षतः’ न भवति । अनेन कारणेन ‘नखक्षतानीव वनस्थलीनाम्’ इत्यत्र ‘इव’ शब्दः ‘सादृश्यवाचकः’ नास्ति । परन्तु ‘सम्भावनायाः’ बोधकोऽस्ति । अतोऽत्र ‘उपमा’ न, अपितु ‘उत्प्रेक्षालङ्कारः’सङ्गच्छते इत्यप्पयदीक्षितस्य मतम्।

‘लिम्पतीव तमोङ्गानि वर्षतीवाञ्जनं नभः।
असत्पुरूषसेवेव दृष्टिर्विफलतां गता[5]’॥ इति

शूद्रककविकृतमृच्छकटिके‘गाढान्धकारस्य’ वर्णनं प्रस्तुतपद्येन क्रियते। तद् यथा – अन्धकारः अङ्गम्-अङ्गं लेपयन् स्यात्, नभः कज्जलं वर्षयन् स्यात्, अतः दृष्टिःदुर्जनपुरूषेण क्रियमाणा सेवासदृशं व्यर्था अभवत्।
अस्मिन् पद्ये अन्धकारस्य (उपमेयस्य) प्रसारः ‘लेपनव्यञ्जनवर्षेण’ (उपमानेन) सह एकरूपतायाः सम्भावना क्रियमाणा विद्यते।
अत्र उत्तरार्धे ‘उपमालङ्कारः’ वर्तते । अतः ‘पूर्वार्धमेव’ उत्प्रेक्षायाः उदाहरणमिति अवगन्तव्यम् । सम्पूर्णे श्लोके सघनान्धकारस्य वर्णनमस्ति । उपमावाचकरूपेण ‘इव’ शब्दस्य प्रसिद्धौ सत्यपि, सः ‘इव’ शब्दः ‘उत्प्रेक्षायाः’ अपि बोधको भवितुर्महति। इदमेव वक्तुं ग्रन्थकारेण प्रस्तुतपद्यम् उद्धृतमस्ति।
यद्यपि प्रस्तुतपद्यस्य प्रथमचरणगतोत्प्रेक्षायाम् ‘अन्धकारः’ वस्तुतः अवयवव्याप्तम्, तथापि ‘लेपकस्य’ कल्पना कृता वर्तते । अर्थात् वृत्तिकारस्य कथनानुसारम् अत्र ‘व्यापनक्रियायां’‘लेपनक्रियायाः’ सम्भावना कृताऽस्ति।
इत्थं सम्भावनायाम् आधारभूतं ‘व्यापनं’ ‘लेपनञ्च’। अनयोः साम्यमिदमेव यत् –‘उभयक्रिययोः कारणात्तेषां विषयगतपदार्थस्य मूलस्वरूपं दृग्गोचरो न भवति’ इति।
द्वितीयचरणगतोत्प्रेक्षायां, यद्यपि ‘आकाशः’ ‘अन्धकारस्य’ प्रसारणं कुर्वन् अस्ति । तथापि तस्मिन् ‘कज्जलवृष्टेः’ सम्भावना कृता। अत्र ‘अन्धकारं’ ‘कज्जलमिति’ कथितम्, ‘इयमतिशयोक्तिः’ एव। अर्थात् अवशिष्टं ‘प्रसरणं’‘वर्षणञ्च’ प्रस्तुतोत्प्रेक्षायां सम्भावनायाः ‘विषयः’ ‘विषयी’ च भवतः। इत्थं सम्पूर्णपद्यस्य अयं निष्कर्षः यत् –‘परितः सघनान्धकारः वर्तते, नभः तमन्धकारं सर्वत्र प्रसारयन् वर्तते। तेन कारणेन ‘दृष्टिः’ निरूपयोगिनी सञ्जाता । अस्य

[4]कुमारसम्भवम्-३.२९

[5]मृच्छकटिकम् -१.३४

द्वितीयपादस्य विवेचनार्थं, - वृत्तिगतं 'व्यापनादयः' - अस्मिन् विषये 'उद्योतकारः' वदति यत् –'आदिपदेन कविकल्पितं नभःकर्तृकमञ्जनकर्मकं प्रसरणं गृह्यते' इति । मम्मटकृतस्य उत्प्रेक्षालक्षणस्य उदाहरणस्य च विवेचनं दृष्ट्वा अवगम्यते यत् – केवलं 'तादात्म्यसम्बन्धे' एव 'उत्प्रेक्षा' इति तस्याभीष्टमिति । अर्थात् मम्मटोक्तोत्प्रेक्षा तादात्म्याधिष्ठिताऽस्ति । यस्य, यस्मिन् सम्भावना करणीया अस्ति, तयोः द्वयोः 'उपमान-उपमेयभावः' आवश्यक एव । अमुमेव तथ्यं मम्मटेन उत्प्रेक्षालक्षणे 'प्रकृतस्य समेन' उक्त्वा सूचितमस्ति । इदम् 'उपमान-उपमेयभावसम्बन्धः''तादात्म्यसम्बन्धस्य' समीपे भवति । यतो हि उपमान-उपमेयगतभावस्य लोपे सति तस्मिन् तादात्म्यसम्बन्धः समुत्पद्यते । तादात्म्यस्यार्थः–'तदात्मता' अर्थात् एकस्य वस्तुनः य 'आत्मा', स एव 'आत्मा' अपरवस्तुनोऽपि । अमुमेकात्मकतां (पूर्ण-अभेदः) वदन्ति । उपमायां वस्तुद्वयगतः यः 'अभेदः' मन्यते, सः केवलं 'विशिष्टधर्मस्य' निर्देशं कारयितुं भवति । परन्तु रूपकम् अतिशयोक्त्यादिषु अलङ्कारेषु 'सर्वथा अभेदः' मन्यते । 'लिम्पतीव तमोङ्गानि' - इत्यनेन उदाहरणेन यः 'व्यापनादि लेपनादिरूपतया सम्भावितम्' इत्युक्तमस्ति, सोऽपि मम्मटस्य उपर्युक्तमतस्यैव निदर्शकः विद्यते ।

'गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः,
कैलासस्य त्रिदशवनितादर्पणस्यातिथिः स्याः ।
श्रृङ्गोच्छ्रायैः कुमुदविशदैर्यो वितत्य स्थितः खं
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः'[6]॥ इति

पूर्वमेघे मेघं प्रति यक्षस्योक्तिरियम् - हे मेघ, क्रौञ्चबिलान्निर्गत्य ऊर्ध्वं च गता, रावणबाहूद्वारप्रस्थितशृङ्गसन्धेः देवललनामुकुरभूतस्य कैलासस्य आगन्तुको भवः । यः कैलासः श्वेतपद्मवदुज्ज्वलैः शृङ्गोच्चैराकाशमभिव्याप्य पुञ्जीभूतः शिवस्य अट्टहास इव वर्तत इति ।
अर्थात्–हे मेघ, क्रौञ्चबिलात् निर्गत्य रावणेन स्वभुजाभ्याम् आलिङ्गनेन यस्य शृङ्गसन्धिः शिथिलीकृतः । तादृशस्य देवललनामुकुरस्य कैलासपर्वतस्य आतिथ्यं प्राप्नोतु । यः श्वेतपद्ममिव शिखरोनत्यै आकाशं व्याप्य प्रतिदिनं पुञ्जीभूतस्य शिवस्यातिहास इव स्थितः ।

अस्मिन् पद्ये 'कुमुदविशदैः' इत्यत्रोपमालङ्कारः, 'अट्टहास इव' इत्यत्र चोत्प्रेक्षालङ्कारः विद्यते । कैलासपर्वतस्य सादृश्यं श्वेतकमलेन सह कृतो विद्यते । यत्र कैलासपर्वतस्तु उपमेयः पद्मपुष्पञ्चोपमानम् । 'अट्टहास इव' इत्यत्र प्रकृतमाकाशस्य आच्छादनम्, उपमानरूपात्मकस्य शिवस्यातिहासरूपेण सम्भावना कृता, येन उत्प्रेक्षायाः विषयो भवति ।

स सेनां महतीं कर्षन् पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः[7] ॥ इति

रघुवंशे चतुर्थसर्गे रघोः प्रसंशायां प्रस्तुममिदम् पद्यम् । अर्थात् पूर्वसागरं प्रति महतीं सेनां स्वीकृत्य गच्छन् सः रघुः तथैव शोभते यथा शिवस्य जटाभ्यो निस्सृतां गङ्गां नयन् भगीरथ इति ।
अस्मिन् पद्ये उपमा-उत्प्रेक्षालङ्कारश्च वर्तते इत्युच्यते सामान्यतया । प्रस्तुतप्रसङ्गे राज्ञः रघोः उपमा भगीरथेन सह कृता इत्यतः उपमालङ्कारः वर्तते इति वक्तुं शक्यते । परन्तु उत्प्रेक्षाया अपि प्रसङ्ग अत्र सर्वथा तिरस्कर्तुं न शक्यते । यतः द्वितीयपङ्क्तौ वर्तमानस्य सम्भावनाविषयत्वमेव आधिक्येन सङ्गच्छते ।
एवम् उपमोत्प्रेक्षयोः भेदः अत्यन्तं सूक्ष्मः वर्तते । बहुषु स्थलेषु झटित्येव निर्नयः शक्यते, कुत्रचिच्च चिन्तनानन्तरमेव । तत्रापि उपमालङ्कारे यदा इवशब्दं विहाय अन्ये यथा, सदृशादयः उपमावाचकत्वेन प्रयुज्यन्ते तदा तु तत्र उत्प्रेक्षा कथमपि न भवति । तथैव उत्प्रेक्षावाचकत्वेन इव शब्दं विहाय मन्ये, शङ्के इत्यादयः शब्दाः यदा प्रयुज्यन्ते तदा तत्र उपमा न भवति । केवलम् 'इव'शब्दस्य प्रयोग एव अनयोरलङ्कारयोः निर्णयः कुत्रचित् विवादविषयो भवति । तथापि द्वावप्यलङ्कारौ कविभिः प्राचुर्येण प्रयुज्यमानौ सन्तौ काव्येषु विराजेते इति शम् ।

**सन्दर्भग्रन्थसूची-**


1. अभिज्ञानशाकुन्तलम्, महाकविः कालिदासः, चौखम्बा सुरभारती प्रकाशन, वाराणसी,२०१७
2. काव्यप्रकाशः, मम्मटः, ज्ञानमण्डल लिमिटेड, 'आज' भवन, वाराणसी, २०१५(पु.मु.)
3. काव्यादर्शः, आचार्यदण्डी, भाण्डारकर प्राच्यविद्या संशोधन मन्दिर, पुणे, १९३८


[6]पूर्वमेघः-५८

[7]रघुवंशमहाकाव्यम्-४.३२

4. कुमारसम्भवम्, महाकविः कालिदासः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, २००१
5. चित्रमीमांसा, अप्पयदीक्षितः, राष्ट्रियसंस्कृतविद्यापीठः, तिरूपतिः, १९९९
6. मृच्छकटिकम्, शूद्रकः, कृष्णदास अकादमी, वाराणसी, २००२ (चतु.सं.)
7. मेघदूतम्, महाकविः कालिदासः, कृष्णदास अकादमी, वाराणसी, २००२(चतु.सं.)
8. रघुवंशम्, महाकविः कालिदासः, कृष्णदास अकादमी, वाराणसी, वि.स-२०४०
9. रसगङ्गाधरः(द्वि.आ.), पण्डितराजजगन्नाथः, चौखम्बाविद्याभवनम्, वाराणसी, २०१३ (चन्द्रिकाव्याख्या)
10. रामायण, महर्षि वाल्मीकि, गीताप्रेस गोरखपुर, २०१५
11. संस्कृत काव्यशास्त्र में अलङ्कारों का विकास, दशरथद्विवेदी, राधापब्लिकेसन्स, देहली, २००१

**अन्तर्जालीय कूटांक–**

1. https://hi.wikipedia.org/wiki/
2. https://archive.org/